2. व्यञ्जनसन्धिः

*****जश्त्वसन्धिः*****

When क्, च्, ट्, त्, प्, which are at the end of the word are combined with vowels or third and fourth letters in group (ग,घ,ज,झ,ड,ढ,द,ध,ब,भ) and य, व, र, ल, ह then come in the place of ग्, ज्, ड्, द्, ब् respectively.

1. वाक् + ईशः	= वागीशः	2. अच् + अन्तम्	= अजन्तम्
3. अच् + आदिः	= अजादिः	4. षट् + आननः	= षडाननः
5. सम्राट् + आगतः	= सम्राडागतः	6. सत् + आचारः	= सदाचारः
7. जगत् + ईशः	= जगदीशः	8. सुप् + अन्तम्	= सुबन्तम्
9. दिक् + गजः	= दिग्गजः	10. वाक् + दानम्	= वाग्दानम्
11. अच् + वर्णः	= अज्वर्णः	12. सत् + धर्मः	= सद्धर्मः
13. उत् + योगः	= उद्योगः	14. चित् + रूपम्	= चिद्रूपम्
15. षट् + रिपवः	= षड्रिपवः	16. वाक् + भ्याम्	= वाग्भ्याम्

*****अनुनासिक सन्धिः*****

When क्, च्, ट्, त्, प्, which are at the end of the word are combined with Nasals then the same Nasal come respectively.

1. वाक् + मयम्	= वाङ्मयम्	2. जगत् + नाथः	= जगन्नाथः
3. सत् + मतिम्	= सन्मतिम्	4. अप् + मयम्	= अम्मयम्
5. वाक् + मूलाः	= वाङ्मूलाः	6. एतत् + न	= एतन्न
7. तत् + मयः	= तन्मयः	8. षट् + मासाः	= षण्मासाः
9. षट् + मुखः	= षण्मुखः	10. षट् + नवतिः	= षण्णवतिः
11. चित् + मयम्	= चिन्मयम्	12. तत् + मात्रम्	= तन्मात्रम्

3 *****विसर्गसन्धिः*****

1. विसर्गलोपः (पूर्वपदे अकारान्तः +" :" + उत्तरपदे अ भिन्नस्वरः = विसर्ग should be removed / deleted.

1. सः	+ इच्छति	= स इच्छति	2. एषः	+ उत्तिष्ठति	= एष उत्तिष्ठति
3. एषः	+ ईक्षते	= एष ईक्षते	4. सः	+ गच्छति	= स गच्छति
5. एषः	+ विचरति	= एष विचरति	6. एषः	+ नमति	= एष नमति
7. सः	+ आगच्छति	= स आगच्छति	8. रामः	+ गच्छति	= राम गच्छति
9. कृष्णः	+ एति	= कृष्ण एति	10. रहीमः	+ इच्छति	= रहीम इच्छति
11. मृगः	+ इति	= मृग इति	12. सिंहः	+ इदानीम्	= सिंह इदानीम्
13. गजः	+ उत्सहते	= गज उत्सहते	14. ईश्वरः	+ ईक्षते	= ईश्वर ईक्षते
15. मूषकः	+ उत्पतति	= मूषक उत्पतति	16. तपः	+ उच्यते	= तप उच्यते

17. लताः	+ अत्र	= लता अत्र	18. ताः	+ गच्छन्ति	= ता गच्छन्ति
19. बालाः	+ यान्ति	= बाला यान्ति	20. वृक्षाः	+ वर्धन्ते	= वक्षा वर्धन्ते
21. बालाः	+ जाग्रति	= बाला जाग्रति	22. तरुणाः	+ नमति	= तरुणा नमति
23. गोपालाः	+ हसन्ति	= गोपाला हसन्ति	24. वृध्दाः	+ अत्र	= वृध्दा अत्र
25. लताः	+ वर्धन्ते	= लता वर्धन्ते	26. बालिकाः	+ नमन्ति	= बालिका नमन्ति

2. If विसर्ग is followed and proceeded by a short vowel 'अ' then 1) first विसर्ग changes to 'उ' 2) अ+उ for 'ओ' as per गुणसन्धिः 3) 'अ' changes to a symbol 'ऽ' (ऽ - अवग्रहः)

1. सः	+ अस्ति	= सोऽस्ति	2. एषः	+ अपि	= एषोऽपि
3. सः	+ अवदत्	= सोऽवदत्	4. सः	+ अपतत्	= सोऽपतत्
5. एषः	+ अवदत्	= एषोऽवदत्	6. एषः	+ अत्र	= एषोऽत्र
7. सः	+ अपि	= सोऽपि	8. एषः	+ अपि	= एषोऽपि
9. सः	+ अतीव	= सोऽतीव	10. एषः	+ अतीव	= एषोऽतीव
11. बालः	+ अस्ति	= बालोऽस्ति	12. नृपः	+ अतीव	= नृपोऽतीव
13. मृगः	+ अपि	= मृगोऽपि	14. सिंहः	+ अत्र	= सिंहोऽत्र
15. चन्द्रः	+ अयम्	= चन्द्रोऽयम्	16. पुरुषः	+ अपि	= पुरुषोऽपि
17. रामः	+ अयम्	= रामोऽयम्	18. कृष्णः	+ अस्ति	= कृष्णोऽस्ति
19. कः	+ अत्र	= कोऽत्र	20. वृध्दः	+ अत्र	= वृध्दोऽत्र

3. The विसर्ग (:) proceed by short vowel 'अ' and followed by any letter of ग ज य र ल व ह then also विसर्ग changes to 'उ'. Again by गुणसन्धिः it changes to 'ओ'

1. तपः + वनम्	= तपोवनम्	2. बालः + हसति	= बालोहसति
3. सिंहः + गर्जति	= सिंहोगर्जति	4. रामः + गच्छति	= रामोगच्छति
5. वृक्षः + वर्धते	= वृक्षोवर्धते	6. वृक्षः + रक्षति	= वृक्षोरक्षति
7. देवः + जनानाम्	= देवोजनानाम्	8. देवः + गच्छति	= देवोगच्छति
9. मनः + हरः	= मनोहरः		

4. रकारादेशः If विसर्ग (:) proceed by any vowel other than 'अ' and followed by any vowel or by any letter ग् घ् ज् झ् ड् ढ् द् ध् न् ब् भ् म् य् र् ल् व् ह् it changes to 'र्' (Other than अ) any vowel +:+ any vowel / consonant.

1. महीषीः + इति	= महिषीरिति	2. मुनिः + गच्छति	= मुनिर्गच्छति
3. तैः + भक्ष्यते	= तैर्भक्ष्यते	4. धेनुः + धावति	= धेनुर्धावति
5. एतैः + नम्यते	= एतैर्नम्यते	6. जनैः + गम्यते	= जनैर्गम्यते
7. पत्युः + गृहम्	= पत्युर्गृहम्	8. गुरुः + गृहम्	= गुरुर्गृहम्
9. गुरुः + वदति	= गुरुर्वदति	10. धेनुभिः + आगतम्	= धेनुभिरागतम्
11. हरिः + जयति	= हरिर्जयति	12. अन्नैः + भागम्	= अन्नैर्भागम्
13. मृत्युः + भयम्	= मृत्युर्भयम्	14. भवेयुः + बहवः	= भवेयुर्बहवः
15. निः + बलः	= निर्बलः	16. शिशुः + हसति	= शिशुर्हसति
17. ग्लानिः+ भवति	= ग्लानिर्भवति	18. गुरुः + भवति	= गुरुर्भवति
19. मुनिः + याति	= मुनिर्याति		

4. - 2. अव्यय सम्बन्धी रकारादेशः

1. प्रातः + गच्छति	= प्रातर्गच्छति	2. प्रातः + उदेति	= प्रातरुदेति
3. पुनः + उपविशति	= पुनरुपविशति	4. पुनः + आस्ते	= पुनरास्ते
5. प्रातः + उत्तिष्ठति	= प्रातरुत्तिष्ठति	6. प्रातः + वन्दनीयः	= प्रातर्वन्दनीयः

5. स्, ष्, श् कार आदेशसन्धिः

(स् / त् / थ् परे सति) स्

(ष् / क् / ख् / ट् / ठ् /प् /फ परे सति) ष्

(श् / च् / छ् परे सति) श् भवति।

1. बालः	+ तत्र	= बालः	+ स् + तत्र	= बालस्तत्र
2. कृष्णः	+ तदा	= कृष्णः	+ स् + तदा	= कृष्णस्तदा
3. गोपालः	+ तथैव	= गोपालः	+ स् + तथैव	= गोपालस्तथैव
4. भक्तः	+ सेवते	= भक्तः	+ स् + सेवते	= भक्तस्सेवते
5. निः	+ संदेहः	= निः	+ स् + संदेह	= निस्संदेहः
6. डयमानः	+ टिट्टिभः	= डयमानः	+ ष् + टिट्टिभः	= डयमानष्टिट्टिभः
7. धनुः	+ टङ्कारः	= धनुः	+ ष् + टङ्कारः	= धनुष्टङ्कारः
8. रूप्यकैः	+ ठनठनायते	= रूप्यकैः	+ ष् + ठनठनायते	= रूप्यकैष्ठनठनायते
9. निः	+ कलंक	= निः	+ ष् + कलंक	= निष्कलंक
10. चतुः	+ पाद	= चतुः	+ ष् + पदा	= चतुष्पाद
11. निः	+ फल	= निः	+ ष् + फल	= निष्फल
12. दुः	+ कर्म	= दुः	+ ष् + कर्म	= दुष्कर्म
13. दुः	+ कर	= दुः	+ ष् + कर	= दुष्कर
14. बहिः	+ कारः	= बहिः	+ ष् + कारः	= बहिष्कारः
15. निः	+ पापम्	= निः	+ ष् + पापम्	= निष्पापम्
16. निः	+ कपटम्	= निः	+ ष् + कपट	= निष्कपटम्
17. रामः	+ च	= रामः	+ श् + च	= रामश्च
18. शावकः	+ चलति	= शावकः	+ श् + चलति	= शावकश्चलति
19. भक्तः	+ शोभते	= भक्तः	+ श् + शोभते	= भक्तश्शोभते
20. भक्तः	+ चलति	= भक्तः	+ श् + चलति	= भक्तश्चलति
21. छात्रः	+ छादयति	= छात्रः	+ श् + छादयति	= छात्रश्छादयति
22. कः	+ चौरः	= कः	+ श् + चौरः	= कश्चौरः
23. कः	+ चित्	= कः	+ श् + चित्	= कश्चित्
24. निः	+ चल	= निः	+ श् + चल	= निश्चल
25. निः	+ छल	= निः	+ श् + छल	= निश्छल
26. दुः	+ शासन	= दुः	+ श् + शासन	= दुश्शासन

तत्पुरुष - समासः

द्वितीयातत्पुरुषः

When the compound ends with श्रित, अतीत, पतित, गत, अत्यस्त, प्राप्त, आपन्न, गमी and बुभुक्षु then it is Dwitiya Tatpurusha Samasa.

1. कृष्णं श्रितः	= कृष्णश्रितः	2. दुःखम् अतीतः	= दुःखातीतः
3. नरकं पतितः	= नरकपतितः	4. गृहं गतः	= गृहगतः
5. मार्गम् अत्यस्तः	= मार्गात्यस्तः	6. धनं प्राप्तः	= धनप्राप्तः, प्राप्तधनः
7. जीविकाम् आपन्नः	= जीविकापन्नः	8. संशयम् आपन्नः	= संशयापन्नः
9. ग्रामं गतः	= ग्रामगतः	10. नगरं गामी	= नगरगामी
11. अन्नं बुभुक्षुः	= अन्नबुभुक्षुः		

प्रश्नः – कं श्रितः सुखी अस्ति ?

उत्तरम् – कृष्णं श्रितः सुखी अस्ति। (कृष्णश्रितः सुखी अस्ति)

प्रश्नः - सिंहः कुत्र पतितः आसीत् ?

उत्तरम् – सिंहः कूपं पतितः आसीत्। (सिंहः कूपपतितः आसीत्)

तृतीया – तत्पुरुषः

When the compound ends with पूर्व, सदृश, सम, ऊनार्थ, निपुण, मिश्र, and कलह then it is Tritiya Tatpurusha Samasa.

1. सप्ताहेन पूर्वः	= सप्ताहपूर्वः	2. मासेन पूर्वः	= मासपूर्वः
3. मात्रा सदृशः	= मातृसदृशः	4. पित्रा समः	= पितृसमः
5. नखैः भिन्नः	= नखभिन्नः	6. मासेण ऊनम्	= मासोनम्
7. वाचा कलहः	= वाक्कलहः	8. आचारेण निपुणः	= आचारनिपुणः
9. गुडेन मिश्रः	= गुडमिश्रः	10. विद्यया विहीनः	= विद्याविहीनः
11. शंकुलया खण्डः	= शंकुलाखण्डः	12. आचारेण श्लक्ष्णः	= आचारश्लक्ष्णः
13.गुडेन मिश्रः	= गुडमिश्रः	14. हरिणा त्रातः	= हरित्रातः
15. पित्रा समः	= पितृसमः	16. धनेन हीनः	= धनहीनः
17. असिना छिन्नः	= असिछिन्नः	18. रामेण हतः	= रामहतः
19. पुच्छविषाणाभ्यां च हिनः	= पुच्छविषाणहीनः	20. पित्रा सदृशः	= पितृसदृशः

प्रश्नः - त्वं केन पूतं जं पिबसि

उत्तरम् - अहं वस्त्रेण पूतं जलं पिबामि। (अहं वस्त्रपूतं जलं पिबामि)

चतुर्थी – तत्पुरुषः

When the compound ends with अर्थ, बलि, हित, सुखादिशब्दैः and हितम् then it is Chaturthi Tatpurusha Samasa.

1. द्विजाय इयम्	= द्विजार्था	2. द्विजाय इदम्	= द्विजार्थम्
3. द्विजाय अयम्	= द्विजार्थः	4. बालाय अयम्	= बालार्थः
5. भूतेभ्यः बलिः	= भूतबलिः	6. गवे हितम्	= गोहितम्
7. गवे रक्षणम्	= गोरक्षणम्	8. गवे सुखम्	= गोसुखम्
9. जनेभ्यः हितम्	= जनहितम्	10. जीवेभ्यः सुखम्	= जीवसुखम्
11. सर्वेभ्यः सुखम्	= सर्वसुखम्	12. यूपाय दारु	= यूपदारु
13. पाकाय शाला	= पाकशाला	14. भिक्षायै अटनम्	= भिक्षाटनम्
15. कुण्डलाय हिरण्यम्	= कुण्डलहिरण्यम्		

वाक्य प्रयोगः

प्रश्नः - साधुः कस्मै अटनं करोति ?

उत्तरम् – साधुः भिक्षायै अटनं करोति। (साधु भिक्षाटनं करोति)

प्रश्नः - अयं श्रेष्ठी कस्मै लुब्धः अस्ति ?

उत्तरम् – अयं श्रेष्ठी धनाय लुब्धः अस्ति। (अयं श्रेष्ठी धनलुब्धः अस्ति)

पञ्चमी – तत्पुरुषः

When the compound ends with मुक्त, पतित, भय, भीत, भीतशब्दैः and आगत then it is Panchami Tatpurusha Samasa.

1. आलस्यात् मुक्तः	= आलस्यमुक्तः	2. संकटात् मुक्तः	= संकटमुक्तः
3. चक्रात् मुक्तः	= चक्रमुक्तः	4. वृक्षात् पतितः	= वृक्षपतितः
5. स्वर्गात् पतितः	= स्वर्गपतितः	6. चोरात् भयम्	= चोरभयम्
7. वृकात् भीतः	= वृकभीतः	8. व्याघ्रात् भीतः	= व्याघ्रभीतः
9. सिंहात् भीतः	= सिंहभीतः	10. धर्मात् भ्रष्टः	= धर्मभ्रष्टः
11. सुखात् अपेतः	= सुखापेतः	12. ग्रामात् आगतः	= ग्रामादागतः

वाक्य – प्रयोगः

प्रश्नः - कस्मात् भ्रष्टः संन्यासी सम्मानं न लभते?

उत्तरम् – धर्मात् भ्रष्टः संन्यासी सम्मानं न लभते। (धर्मभ्रष्टः संन्यासी सम्मानं लभते)

प्रश्नः - कस्मात् च्युतः मन्त्री कारागारे क्षिप्तः?

उत्तरम् – पदात् च्युतः मन्त्री कारागारे क्षिप्तः। (पदच्युतः मन्त्री कारागारे क्षिप्तः)

षष्ठी – तत्पुरुषः

When the compound ends with पुरुष, पूजकः, रक्तम्, श्रेष्ठ, कुल, वंश and पाचक then it is Shashti Tatpurusha Samasa.

1. कृष्णस्य भक्तः	= कृष्णभक्तः	2. राज्ञः पुरुषः	= राजपुरुषः
3. देवानां पूजकः	= देवपूजकः	4. वृक्षस्य मूलम्	= वृक्षमूलम्
5. अर्थस्य गौरवम्	= अर्थगौरवम्	6. बुद्धेः चातुर्यम्	= बुद्धिचातुर्यम्
7. बुद्धेः मान्द्यम्	= बुद्धिमान्द्यम्	8. तस्य उपरि	= तदुपरि
9. जीवनस्य रक्षा	= जीवनरक्षा	10. मातुः वचनम्	= मातृवचनम्
11. कुलस्य गरुः	= कुलगुरुः	12. लोकस्य नाथः	= लोकनाथः
13. अर्धं रात्रेः	= अर्धरात्रः	14. सर्वं रात्रेः	= सर्वरात्रः
15. मध्यं रात्रेः	= मध्यरात्रः	16. कृष्णस्य सखः	= कृष्णसखः
17. देवानां राजा	= देवराजः	18. नावः अर्थम्	= अर्धनावम्
19. भगवतः अनुग्रहः	= भगवदनुग्रहः	20. सुराणाम् ईशः	= सुरेशः
21. राज्ञः दर्शनम्	= राजदर्शनम्	22. विद्यायाः आलयः	= विद्यालयः
23. भिक्षायाः पात्रम्	= भिक्षापात्रम्	24. रामस्य वचनम्	= रामवचनम्
25. इन्द्रियाणां निग्रहः	= इन्द्रियनिग्रहः	26. परेषाम् उपकारः	= परोपकारः
27. मूषकानाम् अधिपतिः	= मूषकाधिपतिः	28. आत्मनः वशम्	= आत्मवशम्
29. क्रन्दनस्य अनुसरणम्	= क्रन्दनानुसरणम्	30. यूथस्य पतिः	= यूथपतिः
31. रामस्य भक्तः	= रामभक्तिः		

वाक्य – प्रयोगः

प्रश्नः - इदम् आभरणं कस्य अङ्गस्य अस्ति?

उत्तरम् - इदं कण्ठस्य आभरणम् अस्ति। (इदं कण्ठाभरणम् अस्ति)

प्रश्नः - धनिकः कस्य उपार्जनं करोति?

उत्तरम् - धनिकः धनस्य उपार्जनं करोति। (धनिकः धनोपार्जनं करोति)

सप्तमी – तत्पुरुषः

When the compound ends with शौण्डः, धूर्त, कितव, प्रवीण, संवीत, अन्तर, अधि, पटु, पण्डित, कुशल, चपल, निपुण, सिद्ध, शुष्क, and पक्व then it is Saptami Tatpurusha Samasa.

1. कार्ये कुशलः	= कार्यकुशलः	2. शास्त्रे निपुणः	= शास्त्रनिपुणः
3. क्रीडायां प्रवीणः	= क्रीडाप्रवीणः	4. संस्कृते सिद्धः	= संस्कृतसिद्धः
5. लेखे कुशलः	= लेखकुशलः	6. अक्षेषु शौण्डः	= अक्षशौण्डः

7. कार्ये प्रवीणः	= कार्यप्रवीणः	8. कार्ये पटुः	= कार्यपटुः
9. चक्रे बद्धः	= चक्रबद्धः	10. कार्ये दक्षः	= कार्यदक्षः
11. नीतौ निपुणः	= नीतिनिपुणः	12. कलहे रुचिः	= कलहरुचिः
13. व्यवहारे कुशलः	= व्यवहारकुशलः	14. ईश्वरे आधीनः	= ईश्वराधीनः
15. आतपे शुष्कः	= आतपशुष्कः	16. चक्रे बन्धः	= चक्रबन्धः
17. जले मग्नः	= जलमग्नः	18. ग्रामे सिद्धः	= ग्रामसिद्धः

वाक्य – प्रयोगः

प्रश्नः - मन्त्री कस्मिन् निपुणः अस्ति?

उत्तरम् – मन्त्री नीतौ निपुणः अस्ति। (मन्त्री नीतिनिपुणः अस्ति)

प्रश्नः - सेवकः कस्मिन् पटुः अस्ति।

उत्तरम् – सेवकः कार्ये पटुः अस्ति। (सेवकः कार्यपटुः अस्ति)

नञ् तत्पुरुष समासः

It is a variety of Tatpurusha Samasa. The negative particle न is added of the word when Dissolved. The न disapears and takes अ as substitute. Further if the word begins with a Vowel then न becomes अन्.

1. न विद्या	= अविद्या	2. न सत्यम्	= असत्यम्
3. न कार्यम्	= अकार्यम्	4. न आस्था	= अनास्था
5. न एकः	= अनेकः	6. न हिंसा	= अहिंसा
7. न धर्मः	= अधर्मः	8. न चेतनः	= अचेतनः
9. न इष्टम्	= अनिष्टम्	10. न उत्साहः	= अनुत्साहः
11. न विकल्पः	= अविकल्पः	12. न भावः	= अभावः
13. न अभिज्ञः	= अनभिज्ञः	14. न इच्छा	= अनिच्छा
15. न ऋतम्	= अनृतम्	16. न विवेकः	= अविवेकः
17. न परीक्षितम्	= अपरीक्षितम्	18. न एके	= अनेके
19. न विद्या	= अविद्या	20. न विज्ञानम्	= अविज्ञानम्
21. न सत्	= असत्	22. न ध्रुवम्	= अध्रुवम्
23. न आगतः	= अनागतः	24. न दृष्टम्	= अदृष्टम्
25. न श्रुतम्	= अश्रुतम्	26. न पठितम्	= अपठितम्
27. न धार्मिकः	= अधार्मिकः	28. न उपस्थितः	= अनुपस्थितः
29. न आदरः	= अनादरः		

वाक्य – प्रयोगः

प्रश्नः - मूर्खः कः अस्ति ?

उत्तरम् – यस्य विद्या न अस्ति सः मूर्खः अस्ति। (यस्य अविद्या अस्ति सः मूर्खः अस्ति)

प्रश्नः - तस्य वचनं कीदृशम् अस्ति ?

उत्तरम् – तस्य वचनं सत्यम् न अस्ति। (तस्य वचनम् असत्यम् अस्ति)

बहुव्रीहि समासः – अन्यपदार्थप्रधानः बहुव्रीहः। स च द्विपदः, बहुपदः, संख्योत्तरपदः,सहपूर्वपदः, संख्यासमपदः, व्यतिहारलक्षणः, दिगन्तराललक्षणश्चेति भेदात् सप्तविधः। अत्र पूर्वोत्तरपदे स्वं स्वम् अर्थं विहाय अन्यमेव कञ्चिदर्थं प्रकाशयतः।

In this samasa importance is of the meaning of the words. The words refer something else due to the meanings.

1. प्राप्तं धनं यं सः	= प्राप्तधनः	2. अधीतं व्याकरणं येन सः	= अधीतव्याकरणः
3. जितानि इन्द्रियाणि येन सः	= जितेन्द्रियः	4. ऊढः रथः येन सः	= ऊढरथः
5. पीतं गुग्धं येन सः	= पीतदुग्धः	6. कृतं कार्यं येन सः	= कृतकार्यः
7. पीतं दुग्धं यया सा	= पीतदुग्धा	8. दत्तं धनं यस्मै सः	= दत्तधनः
9. निर्गतं भयं यस्मात् सः	= निर्गतभयः	10. पतितं पत्रं यस्मात् सः	= पतितपत्रं
11. शुभम् आननम् यस्याः सा	= शूभानना	12. महान् आशयः यस्य सः	= महाशयः
13. चित्रा गौः यस्य सः	= चित्रगुः	14. रूपवती भार्या यस्य सः	= रूपवद्भार्यः
15. लम्बम् उदरं यस्य सः	= लम्बोदरः	16. पीतम् अम्बरं यस्य सः	= पीताम्बरः
17. श्वेतम् अम्बरम् यस्य सः	= श्वेताम्बरः	18. नीलम् अम्बरम् यस्य सः	= नीलाम्बरः
19. दिशः अम्बराणि यस्य सः	= दिगम्बरः	20. महती सेना यस्य सः	= महासेनः
21. रम्यः पन्थः यस्य सः	= रम्यपथः	22. द्वौ पादौ यस्य सः	= द्विपाद्
23. महान् आत्मा यस्य सः	= महात्मा	24. चत्वारि मुखानि यस्य सः	= चतुर्मुखः
25. दश आननानि यस्य सः	= दशाननः	26. मृतः पुत्रः यस्य सः	= मृतपुत्रः
27. मृता भार्या यस्य सः	= मृतभार्यः	28. विमला मतिः यस्य सः	= विमलमतिः
29. विगतः धवः यस्याः सा	= विधवा	30. विद्या एव धनं यस्य सः	= विद्याधनः
31. शीताः अंशवः यस्य सः	= शीतांशुः (चन्द्रः)	32. नीलं कण्ठं यस्य सः	= नीलकण्ठः
33. लब्धा प्रतिष्ठा येन सः	= लब्धप्रतिष्ठः	34. भग्नः उत्साहः यस्य सः	= भग्नोत्साहः
35. प्रियं दर्शनं यस्याः सा	= प्रियदर्शनी (स्त्री)	36. भीमः पराक्रमः यस्य सः	=भीमपराक्रमः(जनः)
37. अविद्यमानो वत्सः यस्याः सा	= अवत्सा (गौः)	38. अविद्यमानः पुत्रः यस्य सः	= अपुत्रः (पुरुषः)
39. चन्द्रः इव मुखं यस्याः सा	= चन्द्रमुखी	40. शुभम् आननं यस्याः सा	= शुभानना

41. वीराः पुरुषाः यस्मिन् सः = वीरपुरुषकः, (ग्रामः)
42. विमलम् उदकं यस्यां सा = विमलोदका (वापी)
43. पुत्रेण सह विद्यमानः = सपुत्रः (पुता)
44. परिवारेण सह विद्यमानः = सपरिवारः(गृहस्वामी)
45. धनुः पाणौ यस्य सः = धनुष्पाणिः (रामः)
46. खड्गं हस्ते यस्य सः = खड्गहस्तः (योद्धा)
47. अस्त्रं पाणौ यस्य सः = अस्त्रपाणिः (योद्धा)
48. पिनाकः पाणौ यस्य सः = पिनाकपाणिः (शिवः)
49. चक्रं पाणौ यस्य सः = चक्रपाणिः (विष्णुः)
50. चन्द्रः शेखरे यस्य सः = चन्द्रशेखरः (शिवः)
51. लगुडः हस्ते यस्य सः = लगुडहस्तः (व्याग्र)

प्रश्नः - मुनिः कीदृशः अस्ति ?

उत्तरम् - मुनिः तपः एव धनं यस्य तादृशः अस्ति। - मुनिः तपोधनः अस्ति।

अव्ययीभावः समासः

1. अनुरूपम् = रूपस्य योग्यम् (योग्यतार्थे)
2. अनुरथम् = रथस्य पश्चात् (पश्चात् इति अर्थे)
3. अनुवृष्टिम् = वृष्टेः पश्चात् (वर्षानन्तरम्)
4. अनुविष्णु = विष्णोः पश्चात्
5. उपवृक्षम् = वृक्षस्य समीपम् (समीपार्थे)
6. उपगङ्गम् = गङ्गायाः समीपम् (समीपार्थे)
7. उपनीडम् = नीडस्य समीपम् (समीपार्थे)
8. उपविद्यालयम् = विद्यालयस्य समीपम् (उपविद्यालयम्)
8. उपनीडम् = नीडस्य समीपम् (समीपार्थे)
9. उपकृष्णम् = कृष्णस्य समीपम्
10. साट्टहासम् = अट्टहासेन सहितम्
11. सचित्रम् = चित्रेण सहितम् (सहितार्थे)
12. सचक्रम् = चक्रेण युगपत्
13. सक्षत्रम् = क्षत्राणां संपत्तिः
14. सहरि = हरेः सादृश्यम्
15. ससखि = सख्या सदृशः
16. निरजलम् = जलस्य अभावः (अभावार्थे)
17. निरङ्कुशम् = अङ्कुशस्य अभावः (अभावार्थे)
18. निर्विघ्नम् = विघ्नस्य अभावः (अभावार्थे)
19. निर्विघ्नम् = विघ्नानाम् अभावः (अभावार्थे)
20. निर्मक्षिकम् = मक्षिकाणाम् अभावः
21. निष्पापम् = पापानाम् अभ
22. प्रतिग्रामम् = ग्रामे ग्रामे प्रति
23. प्रत्यहम् = अहनि अहनि
24. प्रतिदिनम् = दिने दिने
25. प्रत्येकम् = एकम् एकम् इति
26. प्रत्यर्थम् = अर्थं अर्थं प्रति
27. प्रतिगृहम् = गृहं गृहं प्रति
28. प्रत्यक्षम् = अक्ष्णोः प्रति
29. परोक्षम् = अक्ष्णोः परम्
30. यथाशक्ति = शक्तिम् अनतिक्रम्य
31. यथासमयम् = समयम् अनतिक्रम्य

द्वन्द्व – समासः

In this samasa both the words are pronounced with equal accent and both the words are in the Same gender and same number.

इतरेतर - द्वन्द्वः

1. रामः च कृष्णः च, रामश्च कृष्णश्च = रामकृष्णौ
2. रामः च लक्ष्मणः च, रामश्च लक्ष्मणश्च = रामलक्ष्मणौ
3. भीमः च अर्जुनः च, भीमश्च अर्जुनश्च = भीमार्जुनौ
4. सीता च रामः च, सीता च रामश्च = सीतारामौ
5. रामः च सीता च = सीतारामौ
6. फलानि च पुष्पाणि च = फलपुष्पाणि
7. माता च पिता च = मातापितरौ
8. हरिः च हरः च = हरिहरौ
9. शब्दः च अर्थः च = शब्दार्थौ
10. पत्रं च पुष्पं च फलं च = पत्रपुष्पफलानि
11. ग्रीष्मः च वसन्तः च शिशिरः च = ग्रीष्मवसन्तशिशिराः
12 . कन्दः च मूलं च फलं च = कन्दमूलफलानि

समाहार – द्वन्द्वः

1. अहः च निशा च अनयोः समाहारः = अहर्निशम्
2. अहः च रात्रिः च अनयोः समाहारः = अहोरात्रम्
3. पाणी च पादौ च एषां समाहारः = पाणिपादम्
4. सर्पश्च नकुलश्च अनयोः समाहारः = सर्पनकुलम्
5. यूकाश्च लिक्षाश्च आसां समाहारः = यूकालिक्षम्
6. काकश्च उलूकश्च अनयोः समाहारः = काकोलूकम्
7. शीतं च उष्णं च अनयोः समाहारः = शीतोष्णम्
8. सुखं च दुःखं च अनयोः समाहारः = सुखदुःखम्

वाक्य – प्रयोगः –

प्रश्नः - सः भोजनात् पूर्वं किं प्रक्षालयति।

उत्तरम् - सः भोजनात् पूर्वं पाणी च पादौ च प्रक्षालयति। (सः भोजनात् पूर्वं पाणिपादं प्रक्षालयति)

प्रत्ययाः

कृत् प्रत्ययाः **तद्धित प्रत्ययाः**

कृदन्त प्रतयय

- The प्रत्ययः ending word will be considered as adjective.
- An adjective should not be changed as noun in Sanskrit.

I. तद्धिताः प्रत्ययाः (मतुप् – इन् – ठक् (इक्) – त्व – तल्)

मतुप् – प्रत्ययः संज्ञाशब्दैः सह प्रयुज्यते।

***यथा शक्ति + मतुप् - शक्तिमान्**

धन + मतुप् - धनवान्

*** अयं प्रत्ययः 'युक्तः'/ अस्य अस्ति /अस्मिन् अस्ति वा इति अर्थे प्रयुज्यते।**

*** 'मतुप्' प्रत्ययेन युक्तः शब्दः विशेषणं भवति।**

यथा शक्तिमान् जनः।

*** मत् स्थाने वत्**

यदि शब्दस्य अन्ते स् अथवा अ /आ / वर्गीय प्रथमतत्वारः वर्णाः स्युः तदा मत् स्थाने वत् भवेत्।

*** यथा रूप + मतुप् - रूपवत्**

यशस् + मतुप् - यशस्वत्

भास् + मतुप् - भास्वत्

1. मतुप् मान् - मती - मत्

धातुः	+ प्रत्ययः	पंलिङ्गः	स्त्रीलिङ्गः	नपुंसकलिङ्गः
1. गति	+ मतुप्	गतिमान्	गतिमती	गतिमत्
2. बुद्धि	+ मतुप्	बुद्धिमान्	बुद्धिमती	बुद्धिमत्
3. शक्ति	+ मतुप्	शक्तिमान्	शक्तिमती	शक्तिमत्
4. अग्नि	+ मतुप्	अग्निमान्	अग्निमती	अग्निमत्

5. मति	+ मतुप्	मतिमान्	मतिमती	मतिमत्
6. दीप्ति	+ मतुप्	दीप्तिमान्	दीप्तिमती	दीप्तिमत्
7. कृति	+ मतुप्	कृतिमान्	कृतिमती	कृतिमत्
8. रति	+ मतुप्	रतिमान्	रतिमती	रतिमत्
9. श्री	+ मतुप्	श्रीमान्	श्रीमती	श्रीमत्
10. ह्री	+ मतुप्	ह्रीमान्	ह्रीमती	ह्रीमत्
11. धी	+ मतुप्	धीमान्	धीमती	धीमत्
12. भानु	+ मतुप्	भानुमान्	भानुमती	भानुमत्
13. अंशु	+ मतुप्	अंशुमान्	अंशुमती	अंशुमत्
14. मधु	+ मतुप्	मधुमान्	मधुमती	मधुमत्
15. ज्ञान	+ मतुप्	ज्ञानवान्	ज्ञानवती	ज्ञानवत्
16. फल	+ मतुप्	फलवान्	फलवती	फलवत्
17. धन	+ मतुप्	धनवान्	धनवती	धनवत्
18. गुण	+ मतुप्	गुणवान्	गुणवती	गुणवत्
19. रूप	+ मतुप्	रूपवान्	रूपवती	रूपवत्
20. प्रज्ञा	+ मतुप्	प्रज्ञावान्	प्रज्ञावती	प्रज्ञावत्
21. विद्या	+ मतुप्	विद्यावान्	विद्यावती	विद्यावत्
22. क्रिया	+ मतुप्	क्रियावान्	क्रियावती	क्रियावत्
23. शिखा	+ मतुप्	शिखावान्	शिखावती	शिखावत्
24. दया	+ मतुप्	दयावान्	दयावती	दयावत्
25. नभस्	+ मतुप्	नभस्वान्	नभस्वती	नभस्वत्
26. यशस्	+ मतुप्	यशस्वान्	यशस्वती	यशस्वत्
27. पयस्	+ मतुप्	पयस्वान्	पयस्वती	पयस्वत्

Note -

लिङ्गः	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
पुंलिङ्गः	ज्ञानवान्	ज्ञानवन्तौ	ज्ञानवन्तः
स्त्रीलिङ्गः	ज्ञानवती	ज्ञानवत्यौ	ज्ञानवत्यः
नपुंसकलिङ्गः	ज्ञानवत्	ज्ञानवती	ज्ञानवन्ति
पुंलिङगः	बलवान्	बलवन्तौ	बलवन्तः
स्त्रीलिङ्गः	बलवती	बलवत्यौ	बलवत्यः
नपुंसकलिङगः	बलवत्	बलवती	बलवन्ति

उदा –

1. भागवते बुद्धि + मतुप् परीक्षा भवति ।

अ. बुद्धिमान् आ. बुद्धिमानस्य इ. बुद्धिमताम् ई . बुद्धिमत्सु

2. वीराः अभ्युदये क्षमा+ मतुप् भवन्ति ।

अ. क्षमावन्तः आ. क्षामामन्ताः इ. क्षमावन्ताः ई. क्षमामन्तः

3. सभायाम् बुद्धि+ मतुप् जनाः उपस्थिताः ।

अ. बुद्धिमन्तः आ. बुद्धिवन्तः इ. बुद्धिमान् ई. बुद्धिमन्ताः

2. ठक् (इक)

*** 'ठक्' प्रत्ययस्य स्थाने 'इक' भवति। प्रयोगे तु इक एव दृश्यते। (यथा-समाज + ठक् = सामाजिक) अत्र इदम् अपि ध्यातव्यम् यत् 'ठञ्' प्रत्ययस्य स्थाने अपि 'इक' एव भवति। (दिन + ठञ् = दैनिक)**

***ठक् / ठञ् (इक) प्रत्यये जाते मूलशब्दस्य आदिस्वरस्य वृद्धिः भवति। 'आ' 'ए' 'औ' त्रयः वृद्धिस्वराः सन्ति।**

ते क्रमशः अ - आ

इ, ए - ऐ

उ, ओ - औ

ऋ - आर् इति भवन्ति (कृत्तिका + इक = कार्तिक)

*** 'इक' प्रत्ययान्तं पदं विशेषणपदं भवति। अतः अस्य पदस्य विशेष्यपदानुसारं लिङ्गं भवति।**

धातुः	+ प्रत्ययः	पंलिङ्गः	स्त्रीलिङ्गः	नपुंसकलिङ्गः
1. धातुः	+ प्रत्ययः	= रूपः	रूपी	रूपम्
2. रेवती	+ ठक् (इक)	= रैवतिकः	रैवतिकी	रैवतिकम्
3. अश्वपाली	+ ठक् (इक)	= आश्वपालिकः	आश्वपालिकी	आश्वपालिकम्
4. द्वारपाली	+ ठक् (इक)	= द्वारपालिकः	द्वारपालिकी	द्वारपालिकम्
5. दधि	+ ठक् (इक)	= दाधिकः	दाधिकी	दाधिकम्
6. मरिच	+ ठक् (इक)	= मारिचकः	मारिचकी	मारिचकम्
7. हस्ती	+ ठक् (इक)	= हास्तिकः	हास्तिकी	हास्तिकम्
8. शकट	+ ठक् (इक)	= शाकटिकः	शाकटिकी	शाकटिकम्
9. समाज	+ ठक् (इक)	= सामाजिकः	सामाजिकी	सामाजिकम्
10. अर्थ	+ ठक् (इक)	= आर्थिकः	आर्थिकी	आर्थिकम्
11. सप्ताह	+ ठक् (इक)	= साप्ताहिकः	साप्ताहिकी	साप्ताहिकम्
12. सेना	+ ठक् (इक)	= सैनिकः	सैनिकी	सैनिकम्

13. कल्पना	+ ठक् (इक)	=	काल्पनिकः	काल्पनिकी	काल्पनिकम्
14. बुद्धि	+ ठक् (इक)	=	बौद्धिकः	बौद्धिकी	बौद्धिकम्
15. प्रकृति	+ ठक् (इक)	=	प्राकृतिकः	प्राकृतिकी	प्राकृतिकम्
16. देव	+ ठक् (इक)	=	दैविकः	दैविकी	दैविकम्
17. इतिहास	+ ठक् (इक)	=	ऐतिहासिकः	ऐतिहासिकी	ऐतिहासिकम्
18. धर्म	+ ठक् (इक)	=	धार्मिकः	धार्मिकी	धार्मिकम्
19. शब्द	+ ठक् (इक)	=	शाब्दिकः	शाब्दिकी	शाब्दिकम्
20. पक्षि	+ ठक् (इक)	=	पाक्षिकः	पाक्षिकी	पाक्षिकम्
21. शकुनि	+ ठक् (इक)	=	शाकुनिकः	शाकुनिकी	शाकुनिकम्
22. साहित्य	+ ठक् (इक)	=	साहित्यिकः	साहित्यिकी	साहित्यिकम्
23. वेद	+ ठक् (इक)	=	वैदिकः	वैदिकी	वैदिकम्
24. उद्योग	+ ठक् (इक)	=	औद्योगिकः	औद्यौगिकी	औद्योगिकम्
25. दिन	+ ठक् (इक)	=	दैनिकः	दैनिकी	दैनिकम्
26. मास	+ ठक् (इक)	=	मासिकः	मासिकी	मासिकम्
27. वर्ण	+ ठक् (इक)	=	वार्णिकः	वार्णिकी	वार्णिकम्
28. न्याय	+ ठक् (इक)	=	नैयायिकः	नैयायिकी	नैयायिकम्
29. पुराणि	+ ठक् (इक)	=	पौराणिकः	पौराणिकी	पौराणिकम्

Note -	**लिङ्गः**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
	पुंलिङ्गः	धार्मिकः	धार्मिकौ	धार्मिकाः
	स्त्रीलिङ्गः	धार्मिकी	धार्मिक्यौ	धार्मिक्यः
	नपुंसकलिङ्गः	धार्मिकम्	धार्मिके	धार्मिकानि

उदाहरणः -

1. अहम् भारतस्य <u>नागरिकः</u> (नगर+ठक्) अस्मि । - नागरिकः
2. अत्र (धर्म+ठक्)..... उत्सवः भवति । - धार्मिकः

3. अयम् (वेद+ठक्) ..... विद्वान् अस्ति। - वैदिकः

4. स (पुराण+ठक्) ..... मङ्गलाचरणं करोति। - पौराणिकं

5. दिल्ल्याम् अनेकानि (इतिहास+ठक्) ..... स्थानानि सन्ति। - ऐतिहासिकानि

6. भारतस्य (भूगोल+ठक्) ..... स्थितिः विचित्रा अस्ति। - भौगोलिकी

7. सम्प्रति देशस्य (अर्थ+ठक्) ..... स्थितिः सन्तोषप्रदा। - आस्थिकी

8. (सप्ताह+ठक्) ..... अवकाशः रविवारे भवति। - साप्ताहिकः

9. अयम् (कल्पना+ठक्) ..... उपन्यासः केन लिखितः? - काल्पनिकः

3. त्व – प्रत्ययः (त्व – त्वम्)

*** 'त्व' प्रत्ययस्य प्रयोगः भाववाचक – संज्ञापदानां निर्माणाय भवति।**

*** 'त्व' प्रत्ययस्य प्रयोगः संज्ञाविशेषणपदैः सह भवति।**

*** 'त्व' प्रत्यय – योगेन निर्मिताः शब्दाः नपुंसकलिङ्गे फलशब्दवत् भवन्ति।**

1. पृथु	+ त्व	= पृथुत्वम्	2. मृदु	+ त्व	= मृदुत्वम्
3. ब्राह्मण	+ त्व	= ब्राह्मणत्वम्	4. लघु	+ त्व	= लघुत्वम्
5. प्रसाद	+ त्व	= प्रसादत्वम्	6. खेद	+ त्व	= खेदत्वम्
7. बन्धु	+ त्व	= बन्धुत्वम्	8. रस	+ त्व	= रसत्वम्
9. अम्ल	+ त्व	= अम्लत्वम्	10. कटु	+ त्व	= कटुत्वम्
11. देव	+ त्व	= देवत्वम्	12. राक्षस	+ त्व	= राक्षसत्वम्
13. पिशाच	+ त्व	= पिशाचत्वम्	14. गुरु	+ त्व	= गुरुत्वम्
15. गो	+ त्व	= गोत्वम्	16. क्षत्रिय	+ त्व	= क्षत्रियत्वम्
17. दीर्घ	+ त्व	= दीर्घत्वम्	18. विषाद	+ त्व	= विषादत्वम्
19. शूद्र	+ त्व	= शूद्रत्वम्	20. पण्डित	+ त्व	= पण्डितत्वम्
21. प्रिय	+ त्व	= प्रियत्वम्	22. मधुर	+ त्व	= मधुरत्वम्
23. कषाय	+ त्व	= कषायत्वम्	24. मानव	+ त्व	= मानवत्वम्

25. असुर	+ त्व	= असुरत्वम्		26. ईश्वर	+ त्व	= ईश्वरत्वम्	
27. लघु	+ त्व	= लघुत्वम्		28. मनुष्य	+ त्व	= मनुष्यत्वम्	
29. विशाल	+ त्व	= विशालत्वम्		30. कवि	+ त्व	= कवित्वम्	
31. दीन	+ त्व	= दीनत्वम्		32. क्षत्रिय	+ त्व	= क्षत्रियत्वम्	
33. वीर	+ त्व	= वीरत्वम्		34. शम	+ त्व	= शमत्वम्	

1. ग्रीष्मे सूर्यस्य **प्रचण्डत्वम्** (प्रचण्ड+ त्व) असह्यं वर्तते।

2. परिश्रमस्य **महत्त्वं** (महत्+ त्व) सर्वे जानान्ति।

3. गुरोः **गुरुत्वम्** (गुरु+ त्व) वर्णयितुं न शक्यते।

4. अस्य पिण्डस्य **घनत्वं** (घन+ त्व) मापय।

5. आचार्यशङ्करस्य **विद्वत्त्वं** (विद्वस्+ त्व) आश्चर्यचनकम् आसीत्।

6. वानरस्य **चपलत्वं** (चपल+ त्व) बालकेभ्यः रोचते।

7. काव्यस्य **मधुरत्वम्** (मधुर+ त्व) सहृदयाः जानन्ति।

8. सागरस्य **गहनत्वं** (गहन+ त्व) मापनीयं न अस्ति।

यथा - क. सागरस्य **गहनत्वं** मापनीयं न अस्ति। (गहन + त्व)

ख.अस्य पिण्डस्य **घनत्वं** पापय। (.....+.....)

ग. शङ्करस्य **विद्वत्त्वम्** आश्चर्यजनकम् आसीत्। (.....+.....)

घ. सर्वे परिश्रमस्य **महत्त्वं** स्वीकुर्वन्ति। (.....+.....)

ङ. श्रीरामस्य **देवत्वम्** प्रसिद्धम्। (.....+.....)

च. निम्बः **कटुत्वम्** न त्यजति। (.....+.....)

छ. वानराणां **चपलत्वम्** अस्ति। (.....+.....)

झ. परिश्रमस्य **महत्त्वम्** सर्वे जानन्ति। (.....+.....)

ञ. गुरोः **गुरुत्वम्** अकथनीयम् अस्ति। (.....+.....)

4. तल् (ता) – प्रत्ययः (तल् स्थाने ता आगच्छति)

*** 'तल्' प्रत्ययस्य प्रयोगः संज्ञा-विशेषण-शब्दैः सह क्रियते।**

*** 'तल्' स्थाने 'ता' प्रयुज्यते।**

*** 'ता' योगेन निर्मित – शब्दस्य रूपाणि स्त्रीलिङ्गे 'लतावत्' चलन्ति।**

*** 'तल्' योगेन 'भाववाचक' संज्ञापदानि निर्मीयन्ते।**

*** यथा सुन्दरता, मधुरता, क्रूरता, कोमलता आदयः**

1. शूद्र	+ तल्	= शूद्रता	2. बन्धु	+ तल्	= बन्धुता
3. मित्र	+ तल्	= मित्रता	4. मधुर	+ तल्	= मधुरता
5. स्निग्ध	+ तल्	= स्निग्धता	6. हास्य	+ तल्	= हास्यता
7. प्रसन्न	+ तल्	= प्रसन्नता	8. रुष्ट	+ तल्	= रुष्टता
9. शत्रु	+ तल्	= शत्रुता	10. कटु	+ तल्	= कटुता
11. अम्ल	+ तल्	= अम्लता	12. प्रिय	+ तल्	= प्रियता
13. विषण्ण	+ तल्	= विषण्णता	14. खिन्न	+ तल्	= खिन्नता
15. मुग्ध	+ तल्	= मुग्धता	16. कठोर	+ तल्	= कठोरता
17. ऋजु	+ तल्	= ऋजुता	18. मूर्ख	+ तल्	= मूर्खता
19. कटु	+ तल्	= कटुता	20. पशु	+ तल्	= पशुता
21. बन्धु	+ तल्	= बन्धुता	22. मृदु	+ तल्	= मृदुता
23. लघु	+ तल्	= लघुता	24. चपल	+ तल्	= चपलता
25. मानव	+ तल्	= मानवता			

स्थूलाक्षरपदानां प्रकृति – प्रत्यय विभागं कुरुत –

1.**स्वच्छता** सर्वोपरि अस्ति ।

2. श्यामस्य **दक्षता** गणितविषये अस्ति ।

3. **शीतलता** चन्दनस्य गुणः अस्ति ।

4. स्वभावे **सरलता** भवितव्या ।

5. **मृदुता** कस्य गुणः अस्ति ।

6. संसारे **विश्वबन्धुता** भवेत् ।

7. **स्निग्धता** तैलस्य गुणः अस्ति ।

8. उद्योगी जनः **सफलतां** लभते ।

9. इदृशी तव **मूर्खता**। 10. सज्जनानां **मित्रता** कल्याणं करोति।

11. अग्नेः ..... शीतकोले रोचते। (उष्णता) 12. ..... दुःखदायिनी भवति। (निर्धनता)

13. गृहस्य ..... आनन्ददायिनी भवति। (स्वच्छता) 14. मनसः..... वानरस्य इव भवति। (चञ्चलता)

II. स्त्री – प्रत्ययाः टाप् – प्रत्ययः

- **'टाप्' स्त्रीप्रत्ययः अस्ति। प्रयोगे तु अस्य 'आ' एव शिष्यते।**
- **एषः प्रत्ययः स्त्रीलिङ्गशब्दनिर्माणाय अकारान्तपुंल्लिङ्गशब्दैः सह प्रयुज्यते। यथा बाल + टाप् = बाल+ आ = 'बाला' आदयः।**
- **'अक' भागान्तशब्देषु 'क' वर्णात् पूर्वम् अकारस्थाने 'इ' भवति। यथा – गायक (ग् + आ + य् +अ + क) + टाप् = 'गायिका' आदयः।**
- **'टाप्' प्रत्ययान्तशब्दानां रुपाणि 'लतावत्' भवन्ति।**

1. टाप् – प्रत्ययः (आ)

1. अज + टाप् (आ) = अजा

2. अश्व + टाप् (आ) = अश्वा 3. एडक + टाप् (आ) = एडिका

4. चटक + टाप् (आ) = चटिका 5. मूषक + टाप् (आ) = मूषिका

6. बाल + टाप् (आ) = बाला 7. वत्स + टाप् (आ) = वत्सा

8. मन्द + टाप् (आ) = मन्दा 9. कृपण + टाप् (आ) = कृपणा

10. क्षत्रिय + टाप् (आ) = क्षत्रिया 11. वैश्य + टाप् (आ) = वैश्या

12. ज्येष्ठ + टाप् (आ) = ज्येष्ठा 13. कनिष्ठ + टाप् (आ) = कनिष्ठा

14. कोकिल + टाप् (आ) = कोकिला 15. शूद्र + टाप् (आ) = शूद्रा

16. *आचार्य + टाप् (आ) = आचार्या 17. दीन + टाप् (आ) = दीना

18. *उपाध्याय + टाप् (आ) = उपाध्याया 19. चपल + टाप् (आ) = चपला

20. चतुर + टाप् (आ) = चतुरा 21. निपुण + टाप् (आ) = निपुणा

22. अनुकूल + टाप् (आ) = अनुकूला 23. कृश + टाप् (आ) = कृशा

24. वक्र + टाप् (आ) = वक्रा 25. प्रथम + टाप् (आ) = प्रथमा

26. उत्तम + टाप् (आ) = उत्तमा 27. पृष्ट + टाप् (आ) = पृष्टा

28. तरल + टाप् (आ) = तरला
29. चञ्चल + टाप् (आ) = चञ्चला
30. दक्ष + टाप् (आ) = दक्षा
31. आर्य + टाप् (आ) = आर्या
32. प्रतिकूल + टाप् (आ) = प्रतिकूला
33. क्रूर + टाप् (आ) = क्रूरा
34. सरल + टाप् (आ) = सरला
35. मध्यम + टाप् (आ) = मध्यमा
36. उज्ज्वल + टाप् (आ) = उज्ज्वला

पुंल्लिङ्ग		स्त्रीलिङ्ग	पुंल्लिङ्ग		स्त्रीलिङ्ग
37. मूषकः	+ टाप्	= मूषिका	38. बालकः	+ टाप्	= बालिका
39. चालकः	+ टाप्	= चालिका	40. पालकः	+ टाप्	= पालिका
41. मालकः	+ टाप्	= मालिका	42. सूचकः	+ टाप्	= सूचिका
43. घातकः	+ टाप्	= घातिका	44. नायकः	+ टाप्	= नायिका
45. शायकः	+ टाप्	= शायिका	46. मादकः	+ टाप्	= मादिका
47. श्रावकः	+ टाप्	= श्राविका	48. दायकः	+ टाप्	= दायिका
49. खादकः	+ टाप्	= खादिका			

उदाहरणम्

इयं **शिक्षिका** मधुरं गायति। (शिक्षक + टाप्)

क. रमा अधुना कारयानस्य **चालिका** अस्ति। (..... + ...)
ख. कुलटा कुलस्य **नाशिका** भवति। (..... + ...)
ग. इयं छात्रा अतीव **चञ्चला** अस्ति। (..... + ...)
घ. भवती आतमनः **प्रतिकूला** न भवतु। (..... + ...)
ङ. युष्मासु **ज्येष्ठा** का आसीत् ? (..... + ...)
च. छात्रासु **प्रथमा** का आसीत् ? (..... + ...)
छ. मम **मध्यमा** पुत्री तीव्रं धावति। (..... + ...)
ज. अस्याः ..... (अनुज+टाप्) दीपिका अस्ति। (अनुजा)
झ. दीपिका क्रीडायां ..... (कुशल+टाप्) अस्ति। कुशला
ञ. प्रभादीपिकायोः माता .....((चिकित्सक+टाप्) अस्ति। चिकित्सिका
ट. सा समाजस्य..... (सेवक+टाप्) अपि अस्ति। सेवका
ठ. सा तु स्वभावेन आतीव..... (सरल+टाप्) अस्ति। सरला

2. ङीप् (ई) – प्रत्ययः

*** 'ङीप्' स्त्रीप्रत्ययः अस्ति। प्रयोगदशायाम् अस्य 'ई' एव अवशिष्यते।**

*** स्त्रीलिङ्गशब्दनिर्माणाय 'ङीप्' प्रत्ययः प्रयुज्यते। यथा लौकिक + ङीप् = लौकिकी**

*** 'ङीप्' प्रत्ययान्तशब्दानां रूपाणि नदी शब्दवत् भवन्ति।**

1. देव	+ ङीप् =	देवी	2. तरुण	+ ङीप् =	तरुणी
3. कुमार	+ ङीप् =	कुमारी	4. त्रिलोक	+ ङीप् =	त्रिलोकी
5. किशोर	+ ङीप् =	किशोरी	6. कर्तृ	+ ङीप् =	कर्त्री
7. नेतृ	+ ङीप् =	नेत्री	8. अभिनेतृ	+ ङीप् =	अभिनेत्री
9. दातृ	+ ङीप् =	दात्री	10. जनयितृ	+ ङीप् =	जनयित्री
11. कुरुचर	+ ङीप् =	कुरुचरी	12. पर्वत	+ ङीप् =	पार्वती
13. उरुद्वय	+ ङीप् =	उरुद्वयी	14. उरुमात्र	+ ङीप् =	उरुमात्री
15. आक्षिक	+ ङीप् =	आक्षिकी	16. यादृश	+ ङीप् =	यादृशी
17. रजक	+ ङीप् =	रजकी	18. गौर	+ ङीप् =	गौरी
19. सुन्दर	+ ङीप् =	सुन्दरी	20. नदट्	+ ङीप् =	नदी
